# Raja Nalakritam Charmamundadevi Stotram

# राजा नलकृतं चर्ममुण्डादेवीस्तोत्रम्

## Document Information

Text title : Raja Nalakritam Charmamundadevi Stotram

File name : rAjAnalakRRitaMcharmamuNDAdevIstotram.itx

Category : devii, devI, skandapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : skandapurANa | nAgarakhaNDa | adhyAya 54/19-27||

Latest update : August 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 23, 2025

*sanskritdocuments.org*

# राजा नलकृतं चर्ममुण्डादेवीस्तोत्रम्

ततः स मृण्मयीं कृत्वा चर्ममुण्डधरां नृपः ।
विभवाभावतः पश्चात्फलमूलैरतर्पयत् ॥ १७॥

ततस्तस्याः स्तुतिं कृत्वा पुरः स्थित्वा कृताञ्जलिः ।
श्रद्धया परया युक्तो निषधाधिपतिः स्वयम् ॥ १८॥

जय सर्वगते देवि चर्ममुण्डधरे वरे ।
जय दैत्यकुलोच्छेददक्षे दक्षात्मजे शुभे ॥ १९॥

कालरात्रि जयाचिन्त्ये नवम्यष्टमिवल्लभे ।
त्रिनेत्रे त्र्यम्बकाभीष्टे जय देवि सुरार्चिते ॥ २०॥

भीमरूपे सुरूपे च महाविद्ये महाबले ।
महोदये महाकाये जयदेवि महाव्रते ॥ २१॥

नित्यरूपे जगद्धात्रि सुरामांसवसाप्रिये ।
विकरालि महाकालि जय प्रेतजनानुगे ॥ २२॥

शवयानरते रम्ये भुजङ्गाभरणान्विते ।
पाशहस्ते महाहस्ते रुधिरौघकृतास्पदे ॥ २३॥

फेत्कारारवशोभिष्ठे गीतवाद्यविराजिते ।
जयानाद्ये जय ध्येये भर्गदेहार्धसंश्रये ॥ २४॥

त्वं रतिस्त्वं धृतिस्तुष्टिस्त्वं गौरी त्वं सुरेश्वरी ।
त्वं लक्ष्मीस्त्वं च सावित्री गायत्री त्वमसंशयम् ॥ २५॥

यत्किञ्चित्त्रिषु लोकेषु स्त्रीरूपं देवि दृश्यते ।
तत्सर्वं त्वन्मयं नात्र विकल्पोऽस्ति मम क्वचित् ॥ २६॥

येन सत्येन तेन त्वमत्रावासं द्रुतं कुरु ।
सान्निध्यं भक्तितस्तुष्टा सुरासुरनमस्कृते ॥ २७॥

इति श्रीस्कन्दपुराणे नागरखण्डे चतुःपञ्चाशत्तमाध्यायान्तर्गतं
राजा नलकृतं चर्ममुण्डादेवीस्तोत्रं समाप्तम् ।

स्कन्दपुराण । नागरखण्ड । अध्याय ५४/१९-२७॥

skandapurANa . nAgarakhaNDa . adhyAya 54/19-27..

Proofread by PSA Easwaran

*Raja Nalakritam Charmamundadevi Stotram*
pdf was typeset on August 23, 2025

Please send corrections to *sanskrit@cheerful.com*